RKMVU/Int MA/San/10-15/J2013/SK-103

## SK-103- छान्दोग्योपनिषत् अध्यायः- 6, 7, 8.1-3

कालावधिः – होराद्वयम् पूर्णाङ्काः 50

**A) दशसु अष्टानां रिक्तस्थानानि पूरयत। 1x8=8**

1) स ह द्वादशवर्ष ------------।
2) यथा सोम्यैकेन नखनिकृन्तनेन --------।
3) स यथा शकुनिः सूत्रेण ----------।
4) सेयं देवतैक्षत हन्त----------।
5) कुतस्तु खलु सोम्यैवं स्यादिति -----।
6) यदग्ने रोहितं रूपं ------।
7) तासां त्रिवृतं ----नामरूपे व्याकरोत्।
8) यदग्ने रोहितं रूपं -----रूपाणीत्येव सत्यम्।
9) अशनापिपासे मे सोम्य विजानीहीति-----।
10) अन्नमयं हि सोम्य------------ होवाच।

**B) त्रयोदशसु दश प्रश्नाः वाक्येन वाक्याभ्यां वा समाधेयाः। 1x10=10**

1) "अनूचानमानी स्तब्ध एयाय" कोऽर्थः?
2) पित्रा उपदिष्टः आदेशः कः?
3) सेयं देवता किमिति ईक्षितवती?
4) तप्तपरशुदृष्टान्तं वर्णयत?
5) "तेजोऽशितं त्रेधा विधीयते" कथम्?
6) "प्राणबन्धनं हि मनः सोम्य मनः" अत्र प्राणशब्दस्य कोऽर्थः?
7) सन्मूलाः सदायतनाः सत्प्रतिष्ठाः सर्वाः प्रजाः" इत्यत्र भाष्योक्तार्थः कः?
8) देहस्थितिहेतवः सप्तधातवः के?
9) विदुषः सत्सम्पत्तिक्रमः कः?
10) न्यग्रोधफलदृष्टान्तेन किमुपदिश्यते?
11) केषां सर्वेषु लोकेषु अकामचारो भवति?
12) "सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति" कुतः?
13) नारदः कम् उपससाद?

**C) सप्तसु चतुर्णां मन्त्राणां शाङ्करभाष्यदिशा अर्थविस्तरं कुरुत। 3x4=12**

1) वाचारम्भणं विकारो नामधेयम्---।
2) यदग्ने रोहितं रूपं तेजसः--।
3) स्वप्नान्तं मे सोम्य विजानीहि--।
4) तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजत--।
5) ---सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः।
6) तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते---।

7) यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा----।

**D) चतुर्षु द्वयोः लघुटिप्पणीं कुरुत। 5X2=10**

1) "एकविज्ञानेन सर्वविज्ञानम्"।

2) त्रिवृत्करणविचारः।

3) सुषुप्तावस्थायां जीवस्य अवस्थानम्।

4) "नासतः सदुत्पत्तिः"।

**E) त्रिषु एकस्य लघूपन्यासं कुरुत। 10X1=10**

1) "सतोप्युपचरितमेवेक्षितृत्वम्"इति सांख्योक्तं प्रधानकारणवादं संगृह्य भाष्यतात्पर्यं निरूपयत।

2) "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति भाष्योक्तदिशा मन्त्रमिमं व्याख्यात।

3) अष्टमाध्यायोक्तदिशा ब्रह्मणः लक्षणं, तन्नाम्नः अक्षरोपासनं, तत्फलं च सप्रमाणं वर्णयत।

***

RKMVU/Int MA/San/(09)12-14/J2013/SK-105

## **SK**-105 - तैत्तिरीयोपनिषद्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) सप्तसु पञ्चानां रिक्तस्थानं पूरयत। 1x5=5**

1) स य एषोऽन्तर्हृदय...सेन्द्रयोनिः।

2) माता पूर्वरूपम् ... इत्यधिप्रजम्।

3) ज्ञानमुत्पद्यते ... आत्मनि।

4) मातृदेवो भव ... नो इतराणि।

5) सत्यं वद...व्यवच्छेत्सीः।

6) यतो वाचो...कदाचन।

7) असन्नेव स भवति...विदुरिति।

**B) चतुर्दशसु दशानामुत्तरं लिखत। 1x10=10**

1) कुतो न कर्मारब्धो मोक्षः?

2) ऋतमिति पदस्य कोऽर्थः?

3) शान्तिः शान्तिः शान्तिरिति त्रिर्वचनं किमर्थम्?

4) शिक्षापदस्य कोऽर्थः?

5) कस्मादोङ्कारस्य छन्दःसु ऋषभत्वम्?

6) चतस्रः व्याहृतयः काः?

7) अध्यात्मं पाङ्क्तत्रयं किम्?

8) 'अहं वृक्षस्य' इत्यत्र कीदृशो वृक्ष इहाभिप्रेतः?

9) मातृदोवो भव,विग्रहः कथम्?

10) सत्यं ज्ञानमनन्तमित्यत्र सत्यशब्दार्थः कः?

11) लक्षणे अनन्तपदं किमर्थम्?

12) त्रिविधं आनन्त्यं कीदृशम्?

13) अथ तस्य भयं भवति , कस्य?

14) यतो वाचो निवर्तन्ते, तात्पर्यं किम्?

**C) अष्टसु यथेच्छं पञ्च उत्तरत। 3x5=15**

1) अधिज्यौतिषमध्यात्मं च संहितोपासनं विवृणुत।

2) व्याहृत्युपासकस्य सर्वात्मभावप्रतिपत्तिमार्गं विवृणुत।

3) अधीतवेदस्य किमस्ति कर्तव्यम्?

4) केवलेभ्यः कर्मभ्यः मोक्षप्रतिपत्तिं निराकुरुत।

5) ब्रह्मविदाप्नोति परम् - कथं ब्रह्मणः आप्यत्वम्?

6) लक्षणविशेषणयोः कः भेदः?

7) अन्नमयकोशं विवृणुत।

8) 'असद्वा इदमग्र आसीत्। ततो वै सदजायत।' - व्याख्यात।

**D) त्रिषु द्वयोः लघुटिप्पणीं लिखत।** **5x2=10**

1) व्याहृतिः

2) आचार्यानुशासनम्

3) आनन्दस्य मीमांसा

**E) द्वयोरेकमादाय लघुप्रबन्धं लिखत।** **10x1=10**

1) व्याहृत्युपासनं तैत्तिरीयोपनिषदनुसारेणालोचयत।

2) मोक्षस्य ज्ञानेतरासाधनत्वं विचार्य ज्ञानैकसाध्यत्वं समर्थयत।

***

RKMVU/Int MA/San/(09)12-14/J2013/SK-106

## SK-106 - माण्डूक्यकारिका

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

=========================================

**A) द्वादशसु दशानां यथाभिलाषं रिक्तस्थानं पूरयत। 1x10=10**

1) प्रपञ्चो यदि _________ परमार्थतः।

2) सोऽयमात्मा _________ मकार इति।

3) जागरितस्थानो ________ य एवं वेद।

4) अमात्रश्चतुर्थः _________ य एवं वेद।

5) आदावन्ते च _________ इव लक्षितः।

6) निश्चितायां _________ तद्वदात्मविनिश्चयः।

7) न निरोधो ___________ इत्येषा परमार्थता।

8) अद्वैतं परमार्थो हि __________ न विरुद्ध्यते।

9) मनोदृश्यमिदं _________ नैवोपलभ्यते।

10) लये सम्बोधयेत् _________ न चालयेत्।

11) नास्वादयेत् __________ प्रयत्नतः।

12) न कश्चिज्जायते ________ किञ्चिन्न जायते।

**B) सप्तसु पञ्चानां वाक्येन वाक्याभ्यां वा उत्तरं लिखत। 1x5=5**

1) जागरितस्थानः आत्मा बहिष्प्रज्ञः उत अन्तःप्रज्ञः?

2) ओङ्कारस्य कति मात्राः? कास्ताः?

3) जीवः अद्वैतं कदा बुध्यते?

4) अद्वैतप्रकरणं किमर्थम् आरभ्यते?

5) कदा द्वैतं नैवोपलभ्यते?

6) 'असम्भूतिः' इत्यस्य कः अर्थः?

7) "उपायः सोऽवताराय" किमस्य तात्पर्यम्?

**C) सप्तसु पञ्चानां कारिकाणां शाङ्करभाष्यदिशा व्याख्यानं कुरुत। 2x5=10**

1) प्रपञ्चो यदि विद्येत निवर्तेत न संशय:॥

2) अमात्रोऽनन्तमात्रश्च द्वैतस्योपशम: शिव:॥

3) न निरोधो न चोत्पत्ति: न बद्धो न च साधक:॥

4) अभावश्च रथादीनां श्रूयते न्यायपूर्वकम्॥

5) निगृहीतस्य मनसो निर्विकल्पस्य धीमत:॥

6) सतो हि मायया जन्म युज्यते न तु तत्त्वत:॥

7) मृल्लोहविस्फुलिङ्गाद्यै: सृष्टिर्या चोदितान्यता॥

**D) पञ्चसु त्रयाणां लघुटिप्पणीं लिखत। 5x3=15**

1) आगमप्रकरणम्।

2) ओङ्कारोपासनम्।

3) सर्वविकल्पस्य मूलहेतुः माया।

4) अस्पर्शयोग:।

5) सृष्टिप्रकार: जीवपरमात्मैकत्वबुद्ध्यवताराय उपाय: केवलम्।

**E) त्रिषु एकस्य भाष्योक्तप्रकारेण सप्रमाणं लघूपन्यासं कुरुत। 10x1=10**

1) आगमप्रकरणस्य तात्पर्यम्।

2) वैतथ्यप्रकरणस्य तात्पर्यम्।

3) अद्वैतप्रकरणानुशीलनेन सद्वस्तुन: उत्पत्तिं निराकृत्य सृष्टिश्रुतीनां सङ्गतिम् अद्वितीये ब्रह्मणि प्रदर्शयत।

***

RKMVU/Int MA/San/10-15/J2013/SK-131

**SK-131 – ब्रह्मसूत्रे प्रथमाध्याये आदिमं पादद्वयम्**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

**A) चतुर्दशसु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1) ब्रह्मसूत्राणां को रचयिता?

2) ब्रह्मसूत्रे कति अध्यायाः कति सूत्राणि कति वा अधिकरणानि सन्ति?

3) सिद्धान्ते अध्यासलक्षणं किम्?

4) शून्यवादिनां मते अध्यासलक्षणं किम्?

5) ब्रह्मविद्या किंप्रयोजना?

6) जन्माद्यस्य यत इत्यत्र जन्मन आदित्वं कुतः?

7) कस्मादनन्तरं ब्रह्मजिज्ञासा कर्तव्या?

8) धर्मब्रह्मज्ञानयोः फलं किम्?

9) जन्माद्यस्य यतः इति सूत्रेण लिलक्षयिषितं श्रुतिवाक्यं किम्?

10) आत्मविज्ञानस्य तद्विषयस्य शास्त्रस्य च प्रामाण्यं किमर्थं प्रत्याख्यातुं न शक्यते?

11) ईक्षत्यधिकरणे प्रथमसूत्रे नञा किं निषिध्यते?

12) अचेतने सच्छब्दोपचारः केन सूत्रेण निवार्यते?

13) हेयत्वावचनाच्च इत्यस्मिन् सूत्रे कः न्यायः प्रादर्शि?

14) द्विरूपं हि ब्रह्मावगम्यते – किं तद्रूपद्वयम्?

**B) अष्टसु यथेच्छं पञ्चानामुत्तराणि लिखत । 3x5=15**

1) कथं पुनः प्रत्यगात्मनि अविषये अध्यासः विषयतद्धर्माणाम्?

2) प्रत्यक्षादिप्रमाणानामविद्यावद्विषयत्वं व्याख्यात।

3) मीमांसकमते कथं ब्रह्मणः शास्त्रयोनित्वं न सम्भवति?

4) किमर्थानि तावत् 'आत्मा वाऽरे द्रष्टव्य' इत्यादीनि विधिच्छायानि वचनानि?

5) 'हेयत्वावचनाच्च' सूत्रमिदं व्याख्यात।

6) 'गतिसामान्यात्' इति सूत्रं व्याख्यात।

7) अन्तस्तद्धर्मोपदेशात् – के तद्धर्माः, कथं वा तैः परमात्मनिश्चय इति विवृणुत।

8) शास्त्रदृष्ट्या तूपदेशो वामदेववत् – इति सूत्रं व्याख्यात।

**C) चतुर्षु त्रयमुत्तरत। 5x3=15**

1) कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च?

2) जन्माद्यस्य यतः इति सूत्रेण इदमा निर्दिष्टस्य जगतः स्वरूपं विचारयत।

3) साधनचतुष्टयं व्याख्यात।

4) स्वाप्ययात्–इति सूत्रं व्याख्यात।

**D) त्रिषु यथेच्छम् एकं समाधत्त। 10x1=10**

1) अध्यासभाष्यं संक्षेपेण विवृणुत।

2) आम्नायस्य क्रियैकपरत्वमनूद्य निराकुरुत।

3) 'जन्माद्यस्य यतः' – सूत्रमिदं वैशद्येन निरूपयत।

***

RKMVU/Int MA/San/09-14 & 08-13/J2013/SK-135

## **SK**-135 – ब्रह्मसूत्रे तृतीयाध्याये प्रथमद्वितीयपादौ

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

**A) यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त।** **1x10=10**

1) पञ्चाग्नयः के।

2) रमणीयचरणाः ... इत्यादिश्रुतिस्थचरणशब्दस्योपलक्षणार्थत्वं कस्य मते।

3) कुतः चन्द्रलोको न सम्पूर्यते।

4) तृतीयं स्थानं किम्।

5) स्वप्ने पूर्वपक्षिमते कः कर्ता भवति सिद्धान्तिमते च कः।

6) पूर्वपक्षिमते जीवस्य सुषुप्तिस्थानं किम्।

7) ज्ञेयं यत् तत् ... उच्यते इति पूरयत।

8) परस्य ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशे श्रुतिप्रमाणं किम्।

9) नेति नेति इति श्रुतौ पूर्वपक्षिणां मते निषेधस्य विषयः कः।

10) ब्रह्म वाङ्मनसातीतम् इत्यस्य आशयः कः।

11) अतोऽनलेन तथा हि लिङ्गम् इत्यत्र लिङ्गं किम्।

12) जैमिनिमते कर्मफलदाता कः।

**B) षट्सु पञ्चानां सूत्रपूरणं कुरुत।** **1x5=5**

1) अपि च ... ।

2) तत्रापि ... ।

3) स एव ... ।

4) अम्बुवद ... ।

5) प्रकाशादिवच्चा ... ।

6) अनेन सर्व ... ।

**C) षट्सु अभीष्टानां चतुर्णां सूत्राणामर्थप्रकाशनं कुरुत।** **2.5x4=10**

1) आनर्थक्यमिति चेन्न तदपेक्षत्वात्।

2) मायामात्रन्तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्।

3) प्रकाशवच्चावैयर्थ्यात्।

4) उभयव्यपदेशात् त्वहिकुण्डलवत्।

5) प्रतिषेधाच्च।

6) धर्मं जैमिनिरत एव।

**D) पञ्चसु अभीष्टानां त्रयाणां लघुप्रबन्धं रचयत।** **5x3=15**

1) नातिचिराधिकरणम्।

2) साभाव्यापत्त्यधिकरणम्।

3) तदभावाधिकरणम्।

4) पराधिकरणम्।

5) फलाधिकरणम्।

**E) द्वयोः अभीष्टमेकं प्रश्नोत्तरं प्रपञ्चयत।** **10x1=10**

1) पञ्चाग्निविद्यामाश्रित्य जीवो भूतसूक्ष्मैः सम्परिष्वक्तः, सति देहनाशे, गच्छतीति भाष्यदिशा विव्रियताम्।

2) स्वप्ने रथादिसृष्टिः पारमार्थिकी उत मायामयीति सन्ध्यधिकरणपर्यालोचनया विचारयत।

***

RKMVU/Int MA/San/11-16/J2013/SK-161

**SK-161 – वेदान्तसारः**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) चतुर्दशसु वाक्येन वाक्याभ्यां वा दशप्रश्नान् उत्तरत। 1x10=10**

1) पञ्चीकरणस्याप्रामाण्यं नाशङ्कनीयं कुतः?

2) पृथिव्यां के गुणाः सन्ति?

3) स्वेदजं शरीरं नाम किम्,उदाहरणञ्च किम्?

4) अहङ्कारचित्तयोः विषयौ कौ?

5) पुत्रात्मत्वसाधकानुभवः कः?

6) मनस आत्मत्वसमर्थने का युक्तिः?

7) असदात्मवादिनः के? किं श्रुतिप्रमाणम्?

8) को नाम विवर्तः?

9) द्वावेतौ व्याप्नुतो घटं,कौ?

10) तात्पर्यलिङ्गेषु चत्वारि लिखत।

11) समाधिः द्विविधः,कौ च तौ?

12) निर्विकल्पसमाधेः विघ्नचतुष्टयं किम्?

13) न तस्य प्राणा उत्क्रामन्ति , कस्य?

14) क्षीयन्ते चास्य कर्माणि – कस्य कदा कर्माणि क्षीयन्ते?

**B) यथेच्छं अष्टसु पञ्चप्रश्नान् उत्तरत। 3x5=15**

1) काम्यनिषिद्धकर्माणि कानि? किमर्थं तेषां परित्यागो विधेयः?

2) को नाम अध्यारोपः?

3) पञ्चीकरणस्य अप्रामाण्यं कुतो नाशङ्कनीयम्।

4) पञ्चीकरणं व्याख्यात।

5) पुत्राद्यनात्मनां आत्मत्ववादः कथं खण्डित इति सङ्गृह्य लिखत।

6) अध्यारोपापवादाभ्यां तत्वम्पदार्थशोधनं कथं सिद्ध्यति ?

7) तत्त्वमसीत्यत्र जहल्लक्षणयार्थनिर्धारणं कथं न सम्भवति?

8) जीवन्मुक्तलक्षणमालोचयत।

**C) पञ्चसु त्रयाणां लघुटिप्पणीं कुरुत। 5x3=15**

1) अध्यारोपापवादन्यायः

2) अज्ञानस्य शक्तिद्वयम्

3) सूक्ष्मप्रपञ्चः

4) अपवादः

5) जीवन्मुक्तः

**D) द्वयोः विषयमेकमादाय प्रबन्धमारचयत। 10x1=10**

1) अधिकारिलक्षणं यथाग्रन्थं प्रतिपादयत।

2) तत्त्वमसीति वाक्यस्य सम्बन्धत्रयेणाखण्डार्थबोधकत्वं विचार्य, अस्य नीलमुत्पलमिति वाक्यवद्वाक्यार्थत्वं निराकुरुत।

***

RKMVU/Int MA/San/(09)12-14/J2013/SK-167

**SK-167 – सिद्धान्तलेशसंग्रहे प्रथमपरिच्छेदः**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

=======================================

**A) चतुर्दशसु दशानामुत्तरं लिखत। 1x10=10**

1) विधिविचारःकिमुपनिषद्वाक्यमवलम्ब्य प्रवृत्तः ?

2) अपूर्वविधेः लक्षणं किम् ?

3) परिसङ्ख्याविधेः लक्षणमेकं लिखत ?

4) वेदान्तश्रवणे अपूर्वविधिः कस्य मते ?

5) वेदान्तश्रवणे विवरणानुसारिणां पक्षे कः विधिः ?

6) गुरूपसदनविधिः कः?

7) आत्मज्ञाने कीदृशं मनः कारणम् ?

8) सङ्क्षेपशारीरककारमते श्रवणत्वं नाम किम् ?

9) जन्मादिलक्षणत्रयमपि परस्परनिरपेक्षमिति कस्य मतम् ?

10) विवर्तो नाम कः ?

11) मायाशबलमीश्वररूपमेव ब्रह्म उपादानमिति के वदन्ति ?

12) उपादानत्वं नाम किम् ?

13) का नाम माया ?

14) अहं ब्रह्मास्मीत्यभेदे सामानाधिकरण्यमिति कस्य मते ?

**B) षट्सु यथेच्छं चतुर्णामुत्तरं लिखत। 2.5x4=10**

1) नियमविधिपक्षे प्रदर्शितयुक्तिषु यथेच्छमेकां समर्थयत ।

2) मङ्गलश्लोकमुक्त्वा तात्पर्यमुल्लिखत ।

3) विवर्तपरिणामवादयोर्भेदं सलक्षणं स्पष्टयत ।

4) विवरणानुसारिणां मतानुसारं बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्भेदं प्रतिपादयत ।

5) सविशेषानेकशरीरैकजीववादः कः ?

6) सम्बन्धार्था वृत्तिः इति साधयत।

**C) चतुर्षु द्वयोः लघुटिप्पणीं कुरुत। 5x2=10**

1) परिसङ्ख्याविधिः

2) अवच्छेदवादः

3) ब्रह्मणः सर्वज्ञत्वम्

4) अभेदाभिव्यक्तिः

**D) चतुर्षु द्वयोः ग्रन्थोक्तदिशा लघुप्रबन्धं कुरुत। 10x2=20**

1) विधित्रयं यथाग्रन्थं सोदाहरणं विचार्य वेदान्तश्रवणस्य अपूर्वविधिपक्षं समर्थयत।

2) वाचस्पतिमतरीत्या विध्यभावपक्षं निरूपयत।

3) ब्रह्मलक्षणस्य मतभेदं विचार्य जगदुपादानत्वपक्षान् विवृणुत ।

4) वृत्तिद्वारा अज्ञानस्यावरणाभिभवः कीदृश इति ग्रन्थोक्तमतभेदमवलम्ब्य विचारयत ।

***

RKMVU/Int MA/San/08-13/J2013/SK-173

**SK-173 – अद्वैतसिद्धिः**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) पञ्चदशसु दशानां लघूत्तरं लिखत।** **1X10=10**

1) जडत्वहेतुविचारे प्रथमविकल्पे के दोषाः?

2) अस्ति ब्रह्म इत्यत्र लकारः किमर्थं प्रयुक्तः?

3) त्रिविधं परिच्छिन्नत्वं किम्?

4) घटादिकं सद्रूपे कल्पितमित्याद्यनुमानं केनोक्तम्?

5) कालस्य सर्वेन्द्रियग्राह्यत्वं कैः स्वीक्रियते?

6) ब्रह्मणो रूपादिहीनत्वेऽपि कुतश्चाक्षुषत्वम्?

7) सन् घट इति प्रतीतौ अधिष्ठानतया किं भासते?

8) प्रत्यक्षस्य प्रामाण्यं कुतो न निश्चितम्?

9) असञ्जातविरोधित्वात् कस्य प्राबल्यम्?

10) प्रत्यक्षे चानुमाने च ... श्लोकं पूरयित्वा लिखत।

11) कीदृशमनुमानं प्रत्यक्षस्य बाधकम्?

12) अदितिर्द्यौरित्यादिमन्त्राणां दृष्टविरोधात् गौणार्थता केन सूत्रेण साध्यते?

13) परीक्षया प्रत्यक्षस्य कीदृशं प्रामाण्यं सिद्धम्?

14) न विधौ परः शब्दार्थः, कुत्रत्येयमुक्तिः?

15) का नाम प्रतिकर्मव्यवस्था?

**B) षट्सु प्रश्नेषु यथेच्छं चतुर्णामुत्तरं लिखत।** **2.5X4=10**

1) न च रूपादिहीनतया चाक्षुषत्वाद्यनुपपत्तिर्बाधिकेति वाच्यम्।

2) अन्यथा सत्यं ज्ञानम् इत्यधिष्ठानानुवेध एव स्यात्।

3) प्रतिबिम्बेन च बिम्बानुमितिदर्शनात्।

4) यथा गोत्वं सर्वगतमपि सास्नादिमद्व्यक्त्या अभिव्यज्यते।

5) तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम्।
पूर्वस्य बाधकं नायं सर्प इत्याप्तवाक्यवत्।।

6) तर्हीदानीमपि ब्रह्मस्फुरणे चरमवृत्तिवैयर्थ्यम्।

**C) त्रिषु ससन्दर्भं द्वयोः लघुटिप्पणीं लिखत।** **5X2=10**

1) जडत्वम्

2) उपजीव्यत्वम्

3) विषयाधिष्ठानचैतन्यम्

**D) त्रिषु यथाग्रन्थं द्वयोः लघुप्रबन्धं लिखत।** **10X2=20**

1) परिच्छिन्नत्वस्य प्रकारत्रयं यथाग्रन्थमालोच्य पूर्वपक्षिणोपस्थापितदोषान् परिहरत।

2) उपजीव्यत्वेन प्रत्यक्षस्य प्राबल्यं सम्भवति न वेति विचारयत।

3) सिद्धिग्रन्थोक्तां प्रतिकर्मव्यवस्थां संगृह्य प्रतिपादयत।

***

RKMVU/Int MA/San/08-13/J2013/SK-176

**SK-176 – तत्त्वप्रदीपिका(प्रथमपरिच्छेदे आदितः तमसो भावत्वविचारं विहाय विषयविषयीभावप्रत्यादेशान्तम्)**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) षोडशसु एकादशानामुत्तरं लिखत।** **1x11=11**

1) चित्सुखस्य गुरुः कः।
2) प्रत्यक्तत्वप्रदीपिकाया अर्थः कः?
3) स्वप्रकाशत्वलक्षणे अन्तिमविकल्पः कः?
4) स्वप्रकाशत्वस्य प्रथमविल्पे दोषः कः?
5) विपक्षबाधकतर्को नाम कः?
6) अक्षमा भवतः केयं साधकत्वप्रकल्पने कस्य वाक्यमिदम्?
7) आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः,कुत्रोक्तम्?
8) स्वप्रकाशत्वानुमानं किम्?
9) यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ... कस्य इदं वचनम्।
10) उपाधेः लक्षणं किम् ?
11) त्वज्ज्ञानं तवापरोक्षव्यवहारयोग्यत्वे सतीत्याद्यनुमाने कः उपाधिः?
12) न वा अरे पत्युःकामाय पतिःप्रियो भवतीति कुत्रोक्तम्?
13) आत्मनः स्वप्रकाशत्वे श्रुतिः का?
14) मिथ्यात्वनिरूपणे प्रथमः विकल्पः कः?
15) मिथ्यात्वनिरूपणे सिद्धान्त्यभिमतपक्षः कः?
16) न हिंस्यात् सर्वभूतानि,अस्य अपवादवाक्यं किम्?

**B) षट्सु यथेच्छं त्रयाणामुत्तरं लिखत।** **3x3=9**

1) मङ्गलश्लोकोक्तरीत्या हरेः सर्वगतत्वं सर्वात्मकत्वं च निरूपयत।
2) स्वप्रकाशत्वसाधकं व्यतिरेक्यनुमानमुक्त्वा समन्वयत।
3) अपरोक्षव्यवहृतेः ... कुतः, सम्पूर्य विवृणुत।
4) मङ्गलश्लोकमुक्त्वा विवृणुत।
5) का नाम सन्दिग्धानैकान्तिकता।
6) चिद्रूपत्वादकर्मत्वात्.........क्षमः, श्लोकं पूरयित्वा अर्थं लिखत।

**C) चतुर्षु द्वयोः सप्रमाणं टिप्पणीं लिखत।** **5x2=10**

1) यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
2) स्वव्यवहारहेतुप्रकाशत्वं वा, ज्ञानाविषयत्वं वा।
3) अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वं वा।
4) आत्मनः स्वप्रकाशत्वे 'चिद्रूपत्वादकर्मकर्मत्वात् स्वयंज्योतिरिति श्रुतेः' इति।

**D) चतुर्षु यथाग्रन्थं द्वयोः लघुप्रबन्धं लिखत।** **10x2=20**

1) यथेच्छं महाविद्यानुमानद्वयं विलिख्य संयुक्ति तन्निरूपयत।

2) स्वप्राकाशत्वलक्षणप्रमाणयोः निरूपणे उत्तरपक्षं समर्थयत।

3) आत्मनः स्वप्रकाशत्वं चिद्रूपत्वादिहेतुभिः समर्थयत।

4) लक्षणप्रमाणाभ्यां मिथ्यात्वनिरूपणं न सम्भवतीति पूर्वपक्षं समर्थयत।

***

RKMVU/Int MA/San/12-17/J2013/SK-209

## SK-209 – सिद्धान्तकौमुद्याम् कारकम्

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) पञ्चदशसु यथेच्छं दश प्रश्नान् समाधत्त। 1x10=10**

1) प्रातिपदिकार्थसूत्रे नित्यसमासस्य विग्रहः कः।

2) द्रोणो व्रीहिः इत्यत्र कयोः अभेदसन्निकर्षः अभिहितः कौमुदीकारेण।

3) गोः पयो दोग्धि इति वाक्यं शुद्धम् अशुद्धं वा।

4) गतिबुद्धि... इति सूत्रे ज्ञानसामान्यार्थानाम् एव ग्रहणं कथं भवति।

5) नीवह्योर्न वार्तिकमेतत् कदा प्रतिषिध्यते।

6) उपोऽधिके इत्यनेन किं क्रियते।

7) सर्पिषोऽपि स्यात् इत्यत्र कस्य पदार्थत्वम्।

8) नमःस्वस्ति ... इति सूत्रे चकारः किंप्रयोजनकः।

9) गतिबुद्धि... इति सूत्रे घटकतया प्रविष्टं कर्मपदं किंपरम्।

10) यद्व्यापारानन्तरं क्रियानिष्पत्तिः, किं तत्।

11) कारकप्रकरणे शब्दसामर्थ्यगम्यार्थप्रकर्षो गृह्यते न वा।

12) दिवः कर्म च इत्यत्र चकारस्य प्रयोजनं किम्।

13) पुण्येन दृष्टो हरिः इति द्रव्याद्यन्यतमेषु कस्य उदाहरणम्।

14) रजकस्य वस्त्रं ददाति इत्यत्र षष्ठ्याः कस्य मते साधुत्वम्।

15) हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये का विभक्तिः भवति।

**B) अष्टसु अभीष्टाः पञ्च समाधेयाः। 3x5=15**

1) इहोक्तार्थत्वाद् विभक्तेरप्राप्तौ वचनम् इत्यत्र ग्रन्थदिशा टिप्पणीं लिखन्तु।

2) मन्यकर्मणि ... इति सूत्रमिदं ग्रन्थदिशा विवृणुत।

3) अतिरतिक्रमणे च इति सूत्रे सजातीयं दृष्ट्वा ...जातीयो निवर्तते इति अभियुक्तोक्त्या पूर्वसूत्रात् पूजायाम् इति पदानुवृत्तिप्रकारं प्रदर्शयन्तः सूत्रं व्याख्यात।

4) क्रुधद्रुहे ... इति सूत्रम् उदाहरणपूर्वकं लिखन्तु।

5) क्रुध.. उपसृष्टयोः कर्म इति सूत्रस्थोपसृष्टपदस्य अर्थं स्पष्टयन्तः सूत्रं सवृत्तिकं सोदाहरणं च लिखन्तु।

6) तादर्थ्ये चतुर्थी वाच्या इति वार्तिकस्य भावं स्पष्टयन्तु।

7) आख्यातोपयोगे इति सूत्रं व्याख्यात।

8) ससूत्रमेकं रूपं साधयत – केन निमित्तेन।

**C) पञ्चसु अभीष्टानां त्रयाणां समाधानं कुरुत। 5x3=15**

1) अकर्मकपदेन अविवक्षितकर्माणो न गृह्यन्ते इति प्रमाणयन्तु।

2) उपान्वध्याङ्वसः इति पाणिनिसूत्रं यथामति विशदयन्तु।

3) कालाध्वनोरत्य... इति सूत्रं तत्त्वपूर्वकं विवृणुत।

4) कर्तृविषये एका टिप्पणी लेख्या।

5) षष्ठी हेतुप्रयोगे इति सूत्रं व्याख्यात।

**D) द्वयोः अभीष्टमेकं समाधत्त।** **10x1=10**

1) साधकतमं करणम् इति सूत्रं सविस्तरं व्याख्यात।

2) प्रदत्ते अनुच्छेदे अधोरेखाङ्कितेषु दशानां पदानां विभक्तिं सप्रमाणं निर्णयत। –

अनुच्छेदः – वृक्षस्य पततः फलस्य दर्शनेन वानराः उद्ग्रीवाः प्लवनात् न विरमन्ति। वृक्षात् पतनात् भयात् वृक्षाशाखाम् अवलम्ब्य तिष्ठन्ति। तथापि शाखावलम्बनात् पराजयन्ते। व्याघ्राः वानरान् अरण्ये पराजयन्ते। अत एव व्याघ्रेभ्यः निलीयन्ते ते। आत्मगुप्तये वृक्षात् व्याघ्रान् प्रेक्षन्ते।

***

RKMVU/Int MA/San/12-17/J2013/SK-209 Supplementary

## **SK**-209 – सिद्धान्तकौमुद्याम् कारकम्

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) पञ्चदशसु यथेच्छं दश प्रश्नान् समाधत्त। 1x10=10**

1) ग्रामस्य उपरि इति प्रयोगे षष्ठीप्रत्ययविधायकं सूत्रं किम्।
2) गुणकर्मणि का विभक्तिः विकल्पेन इष्यते।
3) चतुर्थी चाशिष्य ... सूत्रं प्रतीकोद्धृतं पूरयत।
4) कस्य आधारः कारकम् अधिकरणसंज्ञो भवति।
5) वैषयिकाधारस्य उदाहरत।
6) कर्मद्वारा औपश्लेषिकाधारस्य उदाहरत।
7) घटे घटत्वमस्ति इतीह कीदृश आधारः।
8) देवदत्तः स्थाल्याम् ओदनं पचति इतीह स्थाली कस्याधारः।
9) क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् इति का विभक्तिः विधीयते।
10) अधीती व्याकरणे इतीह इनिः कस्मिन्नर्थे। केन वा सूत्रेण।
11) चर्मणि द्वीपिनं हन्ति इत्यत्र चर्मद्वीपिनोः कः सम्बन्धः।
12) यस्य च भावेन भावलक्षणमितीह भावपदार्थः कः।
13) आयुक्तकुशलाभ्यां चासेवायाम् इतीह आसेवाशब्दार्थः कः।
14) यतश्च निर्धारणमिति कस्य निर्धारणम्।
15) यतश्च निर्धारणमिति संज्ञया निर्धारणमुदाहरत।

**B) अष्टसु अभीष्टाः पञ्च समाधेयाः। 3x5=15**

1) इहोक्तार्थत्वाद् विभक्तेरप्राप्तौ वचनम् इत्यत्र ग्रन्थदिशा टिप्पणीं लिखन्तु।
2) कर्तुः... इति सूत्रे पुनः कर्मग्रहणम् आधारनिवृत्त्यर्थम् इत्यस्याः पङ्क्त्याः आशयं लिखन्तु।
3) नमः स्वस्ति .. इति सूत्रेण विधीयमानायाः विभक्तेः उपपदत्वं साधयन् सूत्रं ग्रन्थदिशा वर्णयन्तु।
4) अनुप्रतिगृणश्च इति सूत्रं ग्रन्थानुसारेण विवृणुत।
5) तुमर्थाच्च भाववचनात् इति सूत्रं सवृत्तिकम् उदाहरणपूर्वकं च लिखन्तु।
6) उभयप्राप्तौ कर्मणि इति विव्रियताम्।
7) दिवस्तदर्थस्य इति विव्रियताम्।
8) ससूत्रम रूपं साधयत-मातुः स्मरति।

**C) पञ्चसु अभीष्टानां त्रयाणां समाधानं कुरुत। 5x3=15**

1) अपवर्गे तृतीया इति सूत्रं सतत्त्वं वर्णयत।
2) कर्मणा यमभिप्रैति ... इति सूत्रं विस्तरेण प्रस्तूयताम्।
3) वारणार्थानामीप्सितः इति सूत्रं व्याख्यात।
4) कृत्यानां कर्तरि वा इति सूत्रं व्याख्यात।
5) दूरान्तिकार्थेभ्यः इति विभक्तित्रयेण सह चतस्रोत्र विभक्तयः फलिताः इति काः ताः चतस्रो विभक्तयः। प्रत्येकम् उदाहरत।

**D) द्वयोः अभीष्टमेकं समाधत्त।** **10x1=10**

1) अभिधानञ्च प्रायेण तिङ्कृत्त ... फक्किकेयं तत्त्वेन व्याख्यायताम्।

2) प्रदत्ते अनुच्छेदे अधोरेखाङ्कितेषु दशानां पदानां विभक्तिं सप्रमाणं निर्णयत। –

अनुच्छेदः – द्वितीयवर्षीयच्छात्रेभ्यः तृतीयवर्षीयाः छात्राः दक्षतराः। तृतीयवर्षीयेषु अपि वैयाकरणाः। अन्ये विश्वविद्यालयम् अधिशयाना विद्यार्थिनः प्रथमदिने ग्रन्थं पठित्वा षण्मासेषु पठन्ति। तेषु केचिच्च प्रथमदिने ग्रन्थान् दृष्ट्वा षण्मासेभ्यः पश्यन्ति। अधि गुरौ छात्राणाम् अध्ययने उन्नतिः परिलक्ष्यते।

***

RKMVU/Int MA/San/10-15/J2013/SK-223

**SK-223 - सिद्धान्तकौमुद्यां णिजन्तप्रकरणात् लकारार्थप्रकरणं यावत् कृत्यप्रकरणं च**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) विंशतिं स्वल्पैः शब्दैः समाधत्त।** **1x20=20**

1) माणवकमनुक्रीडतीत्यस्यार्थः कः?
2) माणवकमुपनयते इत्यस्यार्थः कः?
3) 'पूर्ववत्सनः' सूत्रस्यास्यार्थः कः?
4) परस्मैपदसंज्ञाविधायकं सूत्रं किम्?
5) 'विभाषाऽकर्मकात्' सूत्रस्यास्यार्थः कः?
6) 'गन्धनावक्षेपण' इति सूत्रं पूरयत।
7) 'उपाद्देव' इति वार्तिकं प्रपूर्य उदाहरणमेकं लिखत।
8) किमर्थं कारकान्तराण्यपि कर्तृसञ्ज्ञां लभन्ते?
9) 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यत्र कर्मणा इति किम्?
10) 'सृज्यते स्रजं भक्तः' इत्यत्र सृज्यते इत्यस्य कोऽर्थः?
11) 'स्मरसि कृष्ण गोकुले वत्स्यामः' इत्यत्र लृटः कोऽर्थः?
12) 'यावद्वास्यते तावद्भोक्ष्यते' इत्यत्र लट् कथं न?
13) 'कदा भुङ्क्ते' इत्यत्र लटः कोऽर्थः?'
14) क्षिप्रवचने लिट्' इत्यत्र लिडिति किमर्थम्?
15) 'वोताप्योः' इत्यत्र पदच्छेदं दर्शयत?
16) 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यस्मिन् सूत्रे विद्यमानस्य सामीप्यपदस्य कः अर्थः कथं च?
17) 'सम्भावनेऽलम्' इत्यादिसूत्रे अलंशब्दस्य कोऽर्थः?
18) कृत्यप्रत्ययाः केषु अर्थेषु भवन्ति?
19) इजादेः सनुमः इत्यत्र इजादेरिति किमर्थम्?
20) शिष्यः इत्यत्र केन सूत्रेण इत्वम्?
21) समाजः इत्यत्र कुत्वस्य निषेधः केन सूत्रेण?
22) प्रणिंसितव्यम् इत्यत्र णत्वं केन सूत्रेण?

**B) रूपद्वयं प्रक्रियापुरस्सरं साधयत।** 5x2=10

1) अध्यजीगपत्
2) ईप्सति
3) अटाट्यते

**C) प्रश्नद्वयम् उत्तरयत।** 5x2=10

1) 'न पादम्याङ्.....' इति सूत्रं व्याख्यात।
2) 'पुरीमवस्कन्द लुनीहि...' इति कारिकेमां प्रपूर्य विशदयत।
3) 'शैषिकान्मतुबर्थीयात्....' इतीमां कारिकां प्रपूर्य उदाहरणेन स्पष्टीकुरुत।

**D) एकम् उत्तरयत।** 10x1=10

1) ओः पुयण्ज्यपरे इति सूत्रं व्याख्यात।

2) स्थाधातोरात्मनेपदं कदा सम्भवति।

RKMVU/Int MA/San/10-15/J2013/SK-225

## SK-225 - सिद्धान्तकौमुद्याम् अदादितः चुरादिपर्यन्तम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

===========================================

**A) यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त। 1x10=10**

1) सुषुविषे इत्यत्र स्वरति... इत्यादिना विकल्पेट् कथन्न।
2) शीङो रुट् इति झस्यैव रुडागमे का हानिः।
3) ऊर्णूञ्-धातोः इजादेश्च... इत्यनेन कथन्नाम्।
4) जुह्वति इत्यत्र अभ्यस्तनिमित्तत्वं कस्य।
5) पिपूर्तः इत्यत्र दीर्घविधायकं शास्त्रं किम्।
6) ऋधातोः लटि प्रथमपुरुषस्य बहुवचने किं रूपम्।
7) ज्ञाजनोर्जा इति आदेशस्य ह्रस्वान्तत्वे को दोषः।
8) श्यन् इतीह शित्करणं किमर्थम्।
9) दीव्यतीत्यत्र दीर्घः केन सूत्रेण।
10) सुनुतः इत्यत्र गुणः कथं न।
11) वव्रश्च इतीह केन सूत्रेण संप्रसारणम्।
12) ममार इतीह आत्मनेपदं कथन्न।

**B) अभीष्टान् अष्टसु पञ्च प्रश्नान् समाधत्त। 3x5=15**

1) अदन्ति, आदतुः अदानि, आद इति प्रयोगेषु केचन त्रयः समाधीयन्ताम्।
2) आहस्थः इति सूत्रस्य ग्रन्थमनुसृत्य व्याख्यानं कुर्वन्तु।
3) स्तौति, ब्रवीति, यन्ति, निरियात् इति एतेषु केचन त्रयः समाधेयाः।
4) तिप्यनस्तेः इति सूत्रं सतत्त्वं व्याख्यात।
5) जनसनखनाम् इति सूत्रं ग्रन्थदिशा विशदयत।
6) चिण् ते पदः इति सूत्रं सार्थं विशदयत।
7) मृङ् धातोः लिङ्लकारे प्रथमपुरुषैकवचने रूपं साध्यताम्।
8) स्वरितेतो धातोः फलं किम्।

**C) अभीष्टान् पञ्चसु त्रीन् प्रश्नान् विशदयत। 5x3=15**

1) द्विषश्च इति पाणिनिसूत्रं ग्रन्थदिशा उदाहरणपूर्वकं च वर्णयन्तु।
2) गाङ् लिटि इति सूत्रं सोदाहरणं लिखन्तु।
3) तनादिकृञ्भ्य उः इति सूत्रं कृञ्ग्रहणस्य प्रयोजनं स्पष्टयन्तः लिखत।
4) शास इदङ्... इति सूत्रं ग्रन्थदिशा व्याख्यात।
5) वभ्रष्ठ इति कथं। लिखत।

**D) द्वयोः अभीष्टमेकं प्रश्नोत्तरं प्रपञ्चयत। 10x1=10**

1) तुरुस्तु ... इति सूत्रे सार्वधातुकपदस्य अत्र पुनः ग्रहणस्य प्रयोजनं प्रतिपादयन्तो यथामति सूत्रं वर्णयन्तु।
2) म्रियतेर्लुङ्लिङोश्च इति सूत्रं सोदाहरणं व्याख्यायताम्।

RKMVU/Int MA/San/12-17/J2013/SK-237

**SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तपुंलिङ्गप्रकरणम् भ्वादिप्रकरणम् च**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

**A) यथेच्छं सप्तसु पञ्च प्रश्नान् समाधत्त। 1x5=5**

1) जरसादेशः केन सूत्रेण।

2) सुडनपुंसकस्य इत्यनेन सूत्रेण किं विधीयते।

3) घिसंज्ञा केन सूत्रेण।

4) ना आदेशः कस्य।

5) अनङादेशः केन सूत्रेण।

6) ङसिङसोश्च इति सूत्रेण किं विधीयते।

7) ख्यत्यात्परस्य। अनेन किं विधीयते।

**B) यथेच्छं चतुर्षु रूपद्वयं साधयत। 5x2=10**

1) रामाय

2) सर्वेषाम्

3) हरौ

4) सख्युः

**C) यथेच्छं चतुर्दशसु दश प्रश्नान् समाधत्त। 1x10=10**

1) अत उपधायाः इति सूत्रस्य वृत्तिं लिखत।

2) इदितः धातोः नुम् केन सूत्रेण विधीयते।

3) सनाद्यन्ता धातवः इति सूत्रे संज्ञासंज्ञिनिर्णयं कुरुत।

4) आयादयः कति के च।

5) क्राम्यति इति रूपे क्रमः दीर्घः केन सूत्रेण।

6) गमिष्यति इति इडागमः केन सूत्रेण।

7) आम्-विधायकं सूत्रमेकं लिखत।

8) एधध्वम् इति रूपं परिचाययत।

9) झस्य अत् क्व।

10) केभ्यः चङ्।

11) सन्यतः इति सूत्रस्य वृत्तिं लिखत।

12) अचीकमत अचकमत इत्यनयोः णिङि रूपं कतरत्।

13) वृतादयः के।

14) यजधात्वर्थः कः।

**D) यथेच्छं सप्तसु पञ्च रूपाणि साधयत। 5x5=25**

1) भूयात्

2) अगोपीत्

3) पेयात्

4) शृणोति

5) एधाञ्चक्रे

6) चकमे

7) त्रेपे

***

RKMVU/Int MA/San/09-14/J2013/SK-243

## SK-243 - महाभाष्ये 5-7 आह्निकानि

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त। 1x10=10**

1) द्विवचनपदं तदन्तस्य बोधकं भवति न वा।
2) ईदूदेत् इत्यत्र तपरग्रहणं दीर्घाणां ग्रहणार्थं कथन्न भवति।
3) अदसो मात् इत्यस्मिन् सूत्रे माद्-ग्रहणेन एदित्यस्य अनुवृत्तिः न भवति। अत्र प्रमाणभूता का सा महाभाष्यस्य पङ्क्तिः।
4) एकाच् इत्यस्य कोऽर्थः गृहीतो भाष्यकारेण।
5) अनाङ् इत्यत्र नञ् कस्मिन्नर्थेऽस्ति।
6) अदोऽभवत् इत्यत्र ओदन्तस्य निपातत्वं कथं वारितं भाष्यकारेण।
7) आद्यन्तवदेकस्मिन् इति सूत्रं केषां कृते आरब्धव्यम्।
8) सर्वादीनि इत्यत्र आदिशब्दस्यार्थः कः।
9) संविज्ञानशब्दस्यार्थः किं कृतः भाष्यकारेण।
10) सर्वनामसंज्ञा तदन्तस्यापि भवति इत्यत्र किं ज्ञापकम्।
11) न बहुव्रीहौ इत्ययं निषेधः कदा प्रवर्तते।
12) अवचनाल्लोकविज्ञानात् इति वार्तिके अवचनं कस्य विशेषणम्।

**B) अभीष्टान् सप्तसु पञ्च प्रश्नान् समाधत्त। 3x5=15**

1) ओतश्च्विप्रतिषेधः इति वार्तिकस्य खण्डनप्रकारं ग्रन्थदिशा प्रदर्शयत।
2) घसंज्ञायां नदीतरे प्रतिषेधः वार्तिकस्य तात्पर्यं बोधयन् खण्डनं लिखत।
3) विभाषा दिक्समास... बहुव्रीहिग्रहणस्य प्रत्याख्यानप्रकारः प्रदर्श्यताम्।
4) कृन्मेजन्तः इति सूत्रे कृद्यो मान्तः इति पक्षे दोषान् प्रदर्श्य समाधत्त।
5) अविभक्तिशब्दः अव्ययसंज्ञो भवतीति पक्षे अन्योन्याश्रयदोषं भाष्यदिशा निरसयत।
6) भर्जिमर्च्योश्च इति वार्तिकं व्याख्यात।
7) वर्णसंज्ञा चेत् निर्वृत्तिः इति वार्तिकं व्याख्यात।

**C) अभीष्टान् पञ्चसु त्रीन् प्रश्नान् विशदयत। 5x3=15**

1) ईदूदेत् इति सूत्रे तपरकरणस्य प्रयोजनं वर्ण्यताम्।
2) क्तक्तवतू निष्ठा इति सूत्रं व्याख्यात।
3) विभाषा जसि इति सूत्रं यथामति विस्तारयत।
4) पूर्वपरावरदक्षिण... इति सूत्रं भाष्यदिशा विव्रियताम्।
5) आद्यन्तौ टकौ इत्येव सूत्रमस्तु इति विषदयत।

**D) द्वयोः अभीष्टमेकं प्रश्नोत्तरं प्रपञ्चयत। 10x1=10**

1) अदसो मात् इति सूत्रं ग्रन्थानुसारं व्याख्यात।
2) षष्ठी स्थानेयोगा इति सूत्रं भाष्यदिशा व्याख्यात।

***

RKMVU/Int MA/San/09-14/J2013/SK-251

**SK-251- परमलघुमञ्जूषा**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) द्वादशसु दशप्रश्नानाम् उत्तरं लिखत।** **1x10=10**

1) परश्रोतृग्राह्या वाक् का।

2) प्राकृतध्वनिः का।

3) शाब्दबोधसहकारिकारणानि कानि।

4) का नाम आकांक्षा।

5) किं नाम तात्पर्यम्।

6) क्रिया का।

7) अस्तिभवत्यादिनामर्थः कः।

8) द्योतकत्वं नाम किं।

9) पर्युदासद्योत्यः कः।

10) वर्त्तमानकालत्वं किम्।

11) कर्मत्वं किम्।

12) अधिकरणत्वं किम्।

**B) अष्टसु पञ्चानां प्रश्नानाम् उत्तरं लिखत।** **3x5=15**

1) बौद्धार्थसत्वे किं मानम्।

2) लक्षणायाः तात्स्थ्यादिनिमित्तानि कानि।

3) व्यञ्जना का।

4) असत्तिः कुतः न शाब्दबोधे सहकारिणी।

5) निपातार्थविषये तार्किकमतनिरसनं कथम्।

6) कुतः इवशब्दः न सादृश्यवाचकः इति।

7) करणत्वं प्रतिपादयत।

8) ध्वनिभेदान् दर्शयत।

**C) पञ्चसु त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1) नैय्यायिकोक्तशक्तिलक्षणखण्डनम्।

2) शक्तेश्चातुर्विध्यं सोदाहरणं वर्णयत।

3) लक्षणाभेदान् परमलघुमञ्जूषादिशा निरूपयत।

4) जानातेः फलं किम् पूर्वपक्षनिरसनपूर्वकं प्रतिपादयत।

5) लिङ्लकारविषये प्राभाकरमतं वर्णयत।

**D) द्वयोः एकम् उपन्यसत।** **10x1=10**

1) शक्तिविषये नैय्यायिकमतखण्डनपुरस्सरं वैय्याकरणमतं प्रतिपादयत।

2) स्फोटस्वरूपं वर्णयत।

RKMVU/Int MA/San/09-14/J2013/SK-255

## SK-255 - परिभाषेन्दुशेखरे 1-50 परिभाषाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A) द्वादशसु दशप्रश्नानाम् उत्तरं लिखत।** **1x10=10**

1) कीदृशानि परिभाषारूपाणि परिभाषेन्दुशेखरे व्याख्यायन्ते।

2) अनुबन्धानामनेकान्तत्वस्थापकः तर्कः कः।

3) नानुबन्धकृतमनेजन्तत्वम् अस्याः ज्ञापकं किम्।

4) कैय्यटादिमते कृत्रिमाकृत्रिमन्यायबीजं किम्।

5) यदागमाः इत्यस्य कः अर्थः।

6) निर्दिश्यमानपरिभाषया ग्रहणकशास्त्रबोधितानामपि ग्रहणमित्यत्र ज्ञापकं किम्।

7) अर्थवद्ग्रहणपरिभाषायाः मूलं किम् ।

8) गौणमुख्यन्याये गौणशब्देन कयोः ग्रहणम्।

9) प्रत्ययग्रहणपरिभाषायां तदाद्यंशः कस्मात् सूत्रात्।

10) यत्र प्रत्ययः निमित्तत्वेनाश्रीयते तत्र कस्यांशस्योपस्थितिः।

11) प्रत्ययग्रहणे चापञ्चम्याः इत्यस्याः कः अर्थः।

12) स्त्रीप्रत्यये इत्यस्याः अर्थः कः।

**B) अष्टसु पञ्चानां प्रश्नानाम् उत्तरं लिखत।** **3x5=15**

1) उभयगतिरिह भवति इति परिभाषायाः ज्ञापकं किम् कथम् ज्ञापयति।

2) आने मुक् इति कथं यदागमपरिभाषायाः अनित्यत्वे ज्ञापकम्।

3) कथं प्रयोक्तुरपि पदादेव गौणत्वप्रतीतिः।

4) उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्।

5) एकस्मिन्नित्यस्य किं प्रयोजनम्।

6) सर्वो द्वन्द्वः विभाषैकवद्भवति।

7) प्रकृतिवदनुकरणं भवति।

8) ओमाङोश्च इत्यत्र आङ्ग्रहणस्य चारितार्थ्यम्।

**C) पञ्चसु त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1) उभयगतिरिह भवति।

2) यदागमपरिभाषा वर्णग्रहणेऽपि प्रवर्तते इति यथाग्रन्थं निरूपयत।

3) वर्णाश्रये नास्ति प्रत्ययलक्षणम्।

4) सर्वो द्वन्द्वः विभाषयैकवद्भवति।

5) पूर्वत्रासिद्धासिद्धपरिभाषयोः बाध्यबाधकभावः।

**D) द्वयोः एकम् उपन्यसत।** **10x1=10**

1) कार्यमनुभवन् हि कार्यी निमित्ततया आश्रीयते।

2) प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम्।

***

RKMVU/Int MA/San/09-14/J2013/SK-267

## **SK**-267- लघुशब्देन्दुशेखरे कारकम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A) यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त।** **1x10=10**

1) ईप्सिततमपदे क्तप्रत्ययस्य वर्तमानार्थत्वेन कटं करिष्यतीत्यत्र कटोत्तरं कथं द्वितीया।

2) कर्तुः सूत्रे नागशेन तमपः फलङ्क्मिभिहितम्।

3) अनभिहिताधिकारस्यावश्यकतास्ति........।

4) उदासीनकर्मणः उदाहरणन्नागेशेन किं प्रदत्तम्।

5) "अकथितं च" सूत्रेस्मिन् अकथितशब्दस्यार्थो कः।

6) लाक्षणिकः सुबन्तः प्रातिपदिकं वा।

7) नागेशमते लिङ्गस्योदाहरणं किम्।

8) नागेशेन स्वस्य प्रातिपदिकार्थे प्रमाणं किं प्रस्तुतम्।

9) प्रथमाकारकस्य क्रियायोगत्वं कथं सम्भवति।

10) नियतोपस्थितिकः इत्यत्र उपस्थितौ व्यापकता भवति तर्हि तन्निरूपिता व्याप्यता कुत्र।

11) प्रत्ययोत्पत्तिः कस्मिन्नर्थे भवति लक्षणास्थले।

12) सिंहो माणवकः इत्यादौ लक्ष्यार्थस्य माणवकादेः नियतोपस्थितिकत्वाभावेन कथं प्रथमा।

**B) अभीष्टान् सप्तसु पञ्च प्रश्नान् समाधत्त।** **3x5=15**

1) कारके इति सूत्रविषये प्रथमार्थे सप्तमी इति मतं निरूपयन्तो यथान्यासस्य संगतिम् उपस्थापयन्तु।

2) प्रातिपदिकार्थः प्रवृत्तिनिमित्ततदाश्रयः इति नागेशमतेन उदाहरणानि प्रदर्शयत।

3) स्तोकं पचतीत्यत्र स्तोकस्य कर्मत्वं साधयत।

4) ग्रामे वासः इत्यस्य स्वरसिद्धिप्रक्रियायाः हेतुं प्रदर्शयत।

5) कर्तुः ... इति सूत्रे कर्मग्रहणं किमर्थमिति प्रपञ्चयत।

6) जटाभिस्तापस इतीह तृतीया कथम्।

7) अशिष्टव्यवहारे का विभक्तिः।

**C) अभीष्टान् पञ्चसु त्रीन् प्रश्नान् विशदयत।** **5x3=15**

1) परिमाणवाचकशब्देभ्योपि प्रथमा प्रातिपदिकार्थे एव स्यात् तर्हि को दोषः इति उपपाद्यताम्।

2) पञ्चकं प्रातिपदिकार्थः इति मतं खण्डयन्तः नियतोपस्थितिकः प्रातिपदिकार्थ इति मतं संसाधयत।

3) कारकाणां प्रधानक्रियानिष्पादकत्वं प्रमाणयन्तु।

4) प्राप्तानन्दः इत्यत्र वृत्तिविग्रहयोः समानार्थत्वम् उपपादयन्तु।

5) अकथितं च इति सूत्रस्य वैयर्थ्यम् उपपादयन्तु।

**D) द्वयोः अभीष्टमेकं प्रश्नोत्तरं प्रपञ्चयत।** **10x1=10**

1) नागेशाभिमतः प्रातिपदिकार्थः निरूप्यताम्।

2) कर्तृकरणयोस्तृतीया इति सूत्रस्य व्याख्या कार्या।

RKMVU/Int MA/San/09-14/J2013/SK-273

**SK-273 – वैयाकरणभूषणसारे समासशक्तिप्रकरणात् स्फोटप्रकरणं यावत्**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) पञ्चदशानां स्वल्पैः शब्दैः समाधत्त।** **1x15=15**

1) परार्थाभिधानं वृत्तिरित्यस्य कोऽर्थः?
2) प्रायोवादभूताश्चत्वारः समासाः के?
3) समासे भेदस्य वाच्यत्वे राजपुरुषपदेन कीदृशो बोधः?
4) एकार्थीभावशक्तेर्लक्षणं लिखत।
5) कस्य मते चकारादिप्रतिषेधो वक्तव्यः?
6) बोधजनकत्वं शक्तिरिति कस्य मतम्?
7) आधुनिकदेवतादिपदात् कथं बोधः?
8) वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोरिति कस्य वचनम्?
9) मीमांसकमते शक्तिज्ञानं कदा शाब्दबोधे कारणं भवति?
10) अपभ्रंशे साधुत्वविचारप्रसङ्गे साधुत्वासाधुत्वयोः किं लक्षणं प्रदत्तम्?
11) अतिरिक्तशक्तिग्रहोपायस्य किं तात्पर्यम्?
12) बोधजनकत्वं शक्तिरिति कस्य मतम्?
13) बोधजनकतायाम् अनादित्वस्य किं लक्षणम्?
14) शक्तिग्राहकेषु मुख्यः कः?
15) आरोपितत्वं नञर्थ इति पक्षे अब्राह्मण इत्यस्य शाब्दबोधः कः?
16) नञ्समासे कस्य प्राधान्यम्?
17) स वाचको विशेषाणां सम्भवात् द्योतकोऽपि वा इत्युक्तिः कस्य?

**B) पञ्चानां विषये लघुटिप्पणीं प्रस्तुत।** **5x5=25**

4) समासे शक्त्यस्वीकारे को दोषः?
5) सङ्केतः शक्तिरिति पक्षे दोषानुद्भावय।
6) शब्दस्य साधुत्वं कीदृशमिष्यते?
7) प्रादीनां द्योतकता चादीनां वाचकता इति पक्षे को दोषः?
8) सङ्ख्याविवक्षां निर्णयत।
9) जातिस्फोटं विचारयत।

**C) एकम् उत्तरयत।** **10x1=10**

4) समासे खलु भिन्नैव शक्तिः इति व्याख्यात।
5) वाचकता स्थानिनाम् उत आदेशानाम्?

***

RKMVU/Int MA/San/10-15/J2013/SK-311

## SK-311- अर्थसङ्ग्रहः

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A) द्वादशसु दशप्रश्नानाम् उत्तरं लिखत।** **1x10=10**

1) विनियोगविधिः कः?

2) विनियोगविधिसहकारिभूतानि प्रमाणानि कति? कानि च तानि?

3) लिङ्गं किम्?

4) प्रकृतिः का?

5) सन्दंशः कः?

6) सन्निपत्योपकारकं किम्?

7) प्रयोगविधिः कः?

8) पाठः कति विधः? के च ते?

9) निषेधः कः?

10) विकल्पप्रसक्तौ नञः धात्वर्थेन योगस्य उदाहरणं किम्?

11) अर्थवादः कः?

12) कः निःश्रेयसहेतुः?

**B) अष्टसु पञ्चानां प्रश्नानाम् उत्तरं लिखत।** **3x5=15**

1) धर्मलक्षणे प्रयोजनवत् इति दलस्य प्रयोजनं किम्?

2) विधिलक्षणं सोदाहरणं लिखत

3) ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यस्य उभयविधित्वं कुतो न?

4) लिङ्गस्य वाक्यात् प्राबल्यं सोदाहरणं निरूपयत?

5) महाप्रकरणं नाम किम्?

6) अश्रुतपुरुषविशेषणत्वस्याप्यधिकारिविशेषणत्वस्योदाहरणानि वर्णयत।

7) मन्त्राणां दृष्टार्थकत्वं प्रतिपादयत।

8) परिसङ्ख्यायाः दोषत्रयं निरूपयत।

**C) पञ्चसु त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1) शाब्दीभावनायाः अंशत्रयं विवृणुत ।

2) श्रुतिः लिङ्गादिभ्यः प्रबला। सोदाहरणं निरूपयत।

3) स्थानप्रमाणं वर्णयत।

4) मुख्यक्रमलक्षणं सोदाहरणं वर्णयत ।

5) अर्थवादः सप्रभेदं वर्ण्यताम्।

**D) द्वयोः एकम् उपन्यसत–** **10x1=10**

1) सोमेन यजेत इत्यत्र मत्वर्थलक्षणा ।

2) प्रयोगविधिसहकारकानि श्रुत्यादि षड्प्रमाणानि संक्षेपेण विवृणुत।

***

RKMVU/Int MA/San/10-15/J2013/SK-331

**SK-331- साङ्ख्यकारिका (1-22 कारिकाः), योगसूत्रञ्च (समाधिपादः)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==============================================

<u>प्रथमखण्डः - सांख्यकारिका</u>

**A) त्रयोदशसु दशप्रश्ननानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1) आध्यात्मिकं दुःखं कतिविधम्? किं तत्?

2) प्रकृतिविकृतयः काः?

3) पुरुषः कीदृशः?

4) प्रमेयसिद्धिः कस्मात्?

5) अनुमानं कति विधम्?

6) अतिदूरादनुपलब्धिः कुत्र?

7) प्रधानानुमितौ कार्यं किम्?

8) उपादानग्रहणात्। अत्र ग्रहणशब्दस्य कोऽर्थः?

9) व्यक्तस्यानेकत्वं कथम्?

10) बुद्ध्यादयः कस्य लिङ्गं भवति?

11) विषयः इत्यस्य कः अर्थः?

12) विषादात्मको गुणः कः?

13) प्रवृत्तित्वं कस्य?

**B) पञ्चसु त्रयाणां प्रश्नानाम् उत्तरं लिखत। 4x3=12**

1) उपमानखण्डनम्।

2) शक्तस्य शक्यकरणात् ।

3) व्यक्ताव्यक्तयोः साधर्म्यम्।

4) रजोगुणः।

5) भोक्तृभावात्।

**C) द्वयोः एकम् उपन्यसत। 8x1=8**

1) सत्कार्यवादः।

2) सर्गप्रक्रिया।

<u>द्वितीयः खण्डः - योगसूत्रम्</u>

**D) चतुर्षु द्वौ समाधेयौ। 4x2=8**

1) अभावप्रत्यावलम्बना वृत्तिः निद्रेति व्याख्यात।

2) वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः। विवृणुत।

3) तज्जपस्तदर्थभावनम्। व्याख्यात।

4) ता एव सबीजः समाधिः। प्रत्याययत।

**E) चतुर्षु द्वौ समाधेयौ। 6x2=12**

1) योगो नाम चित्तवृत्तिनिरोधः। भाष्यस्वारस्येन विवृणुत।

2) श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्। प्रपञ्चयत।

3) योगमते ईश्वरस्वरूपं प्रपञ्चयत।

4) योगप्रोकोतान् चित्तस्थित्युपायान् विवृणुत।

***

RKMVU/Int MA/San/11-16/J2013/SK-343

**SK-343 – तर्कसंग्रहो न्यायबोधिनीसहितः**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

===========================================

**A) यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त। 1x10=10**

1) मङ्गलस्य कारणता विघ्नध्वंसं प्रति केन स्वीकृता।

2) शक्तिरपि पदार्थः कः वदति।

3) घटस्य आत्मत्ववारणाय किमुपायः कर्तव्यः।

4) पीलुपाकवादिनः के सन्ति।

5) शब्दजशब्दस्य उदाहरणं प्रस्तुवन्तु।

6) आन्वीक्षिकी विद्या का।

7) प्रमाणं किम्।

